श्री गणपत्यथर्वशीर्षम्

Shri Ganesh Atharvashirsha

Source: Internet Archive — 1913 Nirnaya Sagar Isha and Other 108 Upanishads, Asiatic Society scan (Ganapatyupanishat on printed pages 1008–1011; full peace invocation on page 4). Also compared: Internet Archive — second 1913 Nirnaya Sagar scan, TMS copy (same printed pages compared); Public Domain Mark 1.0.

मङ्गल, शान्ति और रक्षा

SHLOKA 1

यं नत्वा मुनयः सर्वे निर्विघ्नं यान्ति तत्पदम्।
गणेशोपनिषद्वेद्यं तद्ब्रह्मैवास्मि सर्वगम्॥१॥

yaṃ natvā munayaḥ sarve nirvighnaṃ yānti tatpadam |
gaṇeśopaniṣadvedyaṃ tadbrahmaivāsmi sarvagam ||1||

MANTRA

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः॥

oṃ bhadraṃ karṇebhiḥ śṛṇuyāma devā bhadraṃ paśyemākṣabhiryajatrāḥ |
sthirairaṅgaistuṣṭuvāṃsastanūbhirvyaśema devahitaṃ yadāyuḥ ||
svasti na indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ |
svasti nastārkṣyo ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu ||
oṃ śāntiḥ śāntiḥ śāntiḥ ||

MANTRA

हरिः ॐ। नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव केवलं सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अव चोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्।

hariḥ oṃ | namaste gaṇapataye | tvameva pratyakṣaṃ tattvamasi | tvameva kevalaṃ kartāsi | tvameva kevalaṃ dhartāsi | tvameva kevalaṃ hartāsi | tvameva kevalaṃ sarvaṃ khalvidaṃ brahmāsi | tvaṃ sākṣādātmāsi nityam | ṛtaṃ vacmi | satyaṃ vacmi |
ava tvaṃ mām | ava vaktāram | ava śrotāram | ava dātāram | ava dhātāram | avānūcānamava śiṣyam | ava paścāttāt | ava purastāt | ava cottarāttāt | ava dakṣiṇāttāt | ava cordhvāttāt | avādharāttāt | sarvato māṃ pāhi pāhi samantāt |

गणपति-तत्त्व, प्रणव और गायत्री

MANTRA

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः। त्वं कालत्रयातीतः। त्वं देहत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःस्वरोम्।

tvaṃ vāṅmayastvaṃ cinmayaḥ | tvamānandamayastvaṃ brahmamayaḥ | tvaṃ saccidānandādvitīyo'si | tvaṃ pratyakṣaṃ brahmāsi | tvaṃ jñānamayo vijñānamayo'si | sarvaṃ jagadidaṃ tvatto jāyate | sarvaṃ jagadidaṃ tvattastiṣṭhati | sarvaṃ jagadidaṃ tvayi layameṣyati | sarvaṃ jagadidaṃ tvayi pratyeti | tvaṃ bhūmirāpo'nalo'nilo nabhaḥ | tvaṃ catvāri vākpadāni | tvaṃ guṇatrayātītaḥ | tvaṃ kālatrayātītaḥ | tvaṃ dehatrayātītaḥ | tvaṃ mūlādhārasthito'si nityam | tvaṃ śaktitrayātmakaḥ | tvāṃ yogino dhyāyanti nityam | tvaṃ brahmā tvaṃ viṣṇustvaṃ rudrastvamindrastvamagnistvaṃ vāyustvaṃ sūryastvaṃ candramāstvaṃ brahma bhūrbhuvaḥsvarom |

MANTRA

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्। एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। संहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्री छन्दः। श्रीमहागणपतिर्देवता। ॐ गम्। गणपतये नमः।

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्॥

gaṇādiṃ pūrvamuccārya varṇādiṃ tadanantaram | anusvāraḥ parataraḥ | ardhendulasitam | tāreṇa ṛddham | etattava manusvarūpam | gakāraḥ pūrvarūpam | akāro madhyamarūpam | anusvāraścāntyarūpam | binduruttararūpam | nādaḥ sandhānam | saṃhitā sandhiḥ | saiṣā gaṇeśavidyā | gaṇaka ṛṣiḥ | nicṛdgāyatrī chandaḥ | śrīmahāgaṇapatirdevatā | oṃ gam | gaṇapataye namaḥ |
ekadantāya vidmahe vakratuṇḍāya dhīmahi | tanno dantī pracodayāt ||

ध्यान और नमस्कार

SHLOKA FOUR-VERSE DHYANA

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्।
अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम्॥
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥

ekadantaṃ caturhastaṃ pāśamaṅkuśadhāriṇam |
abhayaṃ varadaṃ hastairbibhrāṇaṃ mūṣakadhvajam ||
raktaṃ lambodaraṃ śūrpakarṇakaṃ raktavāsasam |
raktagandhānuliptāṅgaṃ raktapuṣpaiḥ supūjitam ||
bhaktānukampinaṃ devaṃ jagatkāraṇamacyutam |
āvirbhūtaṃ ca sṛṣṭyādau prakṛteḥ puruṣātparam ||
evaṃ dhyāyati yo nityaṃ sa yogī yogināṃ varaḥ ||

MANTRA

नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमोनमः॥

namo vrātapataye | namo gaṇapataye | namaḥ pramathapataye | namaste'stu lambodarāyaikadantāya vighnavināśine śivasutāya śrīvaradamūrtaye namonamaḥ ||

फलश्रुति और समापन

SHLOKA

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापातकोपपातकात्प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानोऽपापो भवति। धर्मार्थकाममोक्षं च विन्दति। इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान्भवति। सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत्।

etadatharvaśīrṣaṃ yo'dhīte sa brahmabhūyāya kalpate | sa sarvavighnairna bādhyate | sa sarvataḥ sukhamedhate | sa pañcamahāpātakopapātakātpramucyate | sāyamadhīyāno divasakṛtaṃ pāpaṃ nāśayati | prātaradhīyāno rātrikṛtaṃ pāpaṃ nāśayati | sāyaṃ prātaḥ prayuñjāno'pāpo bhavati | dharmārthakāmamokṣaṃ ca vindati | idamatharvaśīrṣamaśiṣyāya na deyam | yo yadi mohāddāsyati sa pāpīyānbhavati | sahasrāvartanādyaṃ yaṃ kāmamadhīte taṃ tamanena sādhayet |

SHLOKA

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नञ्जपति स विद्यावान्भवति। इत्यथर्वणवाक्यम्। ब्रह्माद्याचरणं विद्यात्। न बिभेति कदाचनेति। यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान्भवति। स मेधावान्भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहणे महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात्प्रमुच्यते। महापापात्प्रमुच्यते। महादोषात्प्रमुच्यते। स सर्वविद्भवति स सर्वविद्भवति। य एवं वेदेत्युपनिषत्।

anena gaṇapatimabhiṣiñcati sa vāgmī bhavati | caturthyāmanaśnañjapati sa vidyāvānbhavati | ityatharvaṇavākyam | brahmādyācaraṇaṃ vidyāt | na bibheti kadācaneti | yo dūrvāṅkurairyajati sa vaiśravaṇopamo bhavati | yo lājairyajati sa yaśovānbhavati | sa medhāvānbhavati | yo modakasahasreṇa yajati sa vāñchitaphalamavāpnoti | yaḥ sājyasamidbhiryajati sa sarvaṃ labhate sa sarvaṃ labhate | aṣṭau brāhmaṇānsamyaggrāhayitvā sūryavarcasvī bhavati | sūryagrahaṇe mahānadyāṃ pratimāsaṃnidhau vā japtvā siddhamantro bhavati | mahāvighnātpramucyate | mahāpāpātpramucyate | mahādoṣātpramucyate | sa sarvavidbhavati sa sarvavidbhavati | ya evaṃ vedetyupaniṣat |

MANTRA

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः॥ हरिः ॐ तत्सत्॥

oṃ bhadraṃ karṇebhiḥ śṛṇuyāma devā bhadraṃ paśyemākṣabhiryajatrāḥ |
sthirairaṅgaistuṣṭuvāṃsastanūbhirvyaśema devahitaṃ yadāyuḥ ||
svasti na indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ |
svasti nastārkṣyo ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu ||
oṃ śāntiḥ śāntiḥ śāntiḥ || hariḥ oṃ tatsat ||

COLOPHON

इति गणपत्युपनिषत्समाप्ता॥

iti gaṇapatyupaniṣatsamāptā ||